संस्कृत

क्र.नं. ८३

स्तोत्र

दत्तात्रेयस्तवराज

७८।स्तो.७१

"Joint project of the Rajawade Sanshodhan Mandal, Dhule and the Yashwantrao Chavan Pratishthan, Mumbai."

(1)

॥अथदत्तात्रेयस्तवराज प्रारंभः॥

" Joint project of the Rajawade Sanshodhan Mandal, Dhule and the Yashwantrao Chavan Pratishthan, Mumbai. "

(2)

द॰स्त॰ ॥श्रीगणेशायनमः॥श्रीसद्गुरुमंगलमूर्तयेनमः॥ ॐ श्रीशङ्क स्तो॰
॥१॥ उवाच॥महादेव महादेवदेव देव महेश्वर॥दत्तात्रेयस्तवं दिव्यंश्रो
तुमिच्छामि प्रभो॥१॥ दत्तस्य वद माहात्म्यं देव देव दयानिधे
दत्तापरतरंनास्ति पुराव्यासेन कीर्तितं॥२॥ जगद्गुरुर्जग
न्नाथोगीतयेनारदादिभिः॥तत्सर्वंश्रुद्धिमे देव करुणाकर
शंकर॥३॥ श्रीमहादेव उवाच॥ शृणुव्यासात्मजं दिव्यंगुह्या
त् गुह्यतरं महत्॥ यस्यस्मरण मात्रेण मुच्यते सर्व बंध
नात्॥४॥ दत्तं सनातनं ब्रह्म निर्विकारं निरंजनं॥ आदि
देवं निराकारं व्यक्तं गुण विवर्जितं॥नाम रूप क्रिया तीतं
निःसंगं देव वंदितं॥ नारायणं शिवं शुद्धं दृश्य दर्श ॥१॥
न वर्जितं॥५॥ परेशं पार्वती कांतं रमाधीशं दिगंब

(2A)

रं ॥ निर्मलो नित्यतृप्तात्मा नित्यानंदो महेश्वरः ॥७॥ ब्रह्मा विष्णु शि
वः साक्षात् गोविंदो गतिदायकः ॥ पीतांबरधरो देवो माधवः सू
र सेवितः ॥८॥ मृत्युंजयो महारुद्रः कार्तवीर्यवरप्रदः ॥ ॐ मि
त्येकाक्षरं बीजं क्षराक्षर परं हरिं ॥९॥ गया काशी कुरुक्षेत्रं प्र
याग बद्रिकाश्रमं ॥ एतत्सर्वं कृतं तेन दत्त इत्यक्षरद्वयं ॥१०॥
गौतमी जान्हवी भीमा गंडकी च सरस्वती ॥ एत० कृतं० दत्त०
॥११॥ शरयु चंद्रभागा च यमुना पयवाहिनी ॥ ए. कृ. द. क्ष. ॥१२॥ ता
म्रपर्णी प्रणीता च गोमती तापनाशिनी ॥ ए. कृ. द. क्ष. ॥१३॥ नर्मदा
सिंधु कावेरी कृष्णवेणी स्तथैव च ॥ ए. कृ. द. क्ष. ॥१४॥ अवंति
द्वारका माया मल्लिनाथस्य दर्शनं ॥ ए. द. ॥१५॥ द्वादशं ज्यो।लि।लिं
गं च वाराहे पुष्करे तथा ॥ ए. कृ. द. ॥१६॥ ज्वालामुखी हिंगुला च

Joint project of the Rajawade Sanshodhan Mandal, Dhule and the Yashwantrao Chavan Pratishthan, Mumbai.

द·स्त· सप्तशृंगस्तथैवच॥ए·द·॥१७॥अयोध्यामथुराकांचिरेणुकासेतु स्तो·
॥२॥ बंधनं॥ए·द·॥१८॥अहोबलं त्रिपथगां गंगासागरमेवच॥ए·द·॥
१९॥करवीरं महास्थानं रंगनाथं तथैवच॥ए·द·॥२०॥एकादशीव्र
तंचैवअष्टांगयोगसाधनं॥ए·द·॥२१॥शाकंभरींच मु[illegible]बांकार्ति
कस्वामिदर्शनं॥ए·द·॥२२॥[illegible]लं निष्ठा तपोदानं सामगानं तथैवच
॥ए·द·॥२३॥मुक्तीक्षेत्रंच कामाक्षी तुळजा सिद्धिदेवता॥ए·द·॥२४
अन्नहोमादिकं दानं मेदिन्य श्वगजावृषान्॥ए·द·॥२५॥माघका
र्तिकयोस्नानं सन्यासं ब्रह्मचारिकं॥ए·द·॥२६॥अश्वमेधसह
स्राणी मातृपितृप्रपोषणं॥ए·द·॥२७॥अमितं पोषणं पुण्यमुपकार
स्तथैवच॥ए·द॥२८॥जगंनाथंच गोकर्णं पांडुरंगं तथैवच॥ए·द
२९॥सर्वदेवनमस्कारं सर्वयशाप्रकीर्तिता:ए·द·॥३०॥षडशा ॥२॥
नी स्त्रपुराणा अष्टौ व्याकरणानिच॥ए·द·॥३१॥सावित्रीप्रणवंजप्या

(3A)

चतुर्वेदाश्च पारगाः ॥ एत॰द॰ ॥ ३२ ॥ कन्यादानानि पुण्यानि वान
प्रस्थस्य पोषणं ॥ ३३ ॥ वापीकूपतडागानी काननारोपणानि च ॥ ए॰
द॰ ॥ ३४ ॥ अश्वत्थं तुलसीं धात्रीं सेवते यो नरः सदा ॥ ए॰द॰ ॥ ३५ ॥ शि
वं विष्णुं गणेशं च शक्तिं सूर्यस्य पूजनं ॥ एत॰द॰ ॥ ३६ ॥ गोहत्यादिस
हस्राणि ब्रह्महत्यास्तथैव च ॥ मुच्यते सर्वपापेभ्यो दत्तइ॰ ॥ ३७ ॥ स्वर्ण
स्तेयसुरापानं मातागमनकल्मषं ॥ मुच्य॰ पापे॰ द॰ ॥ ३८ ॥ स्त्रीहत्या
दिकृतं पापं बालहत्यास्तथैव च ॥ मु॰ स॰ पा॰ द॰ ॥ ३९ ॥ प्रायश्चित्तं कृतं
तेन सर्वपापप्रणाशनं ॥ ब्रह्मानंदं भवेत्तानंदत्त॰ ॥ ४० ॥ कलिदो
का ष विनाशार्थं जपेद्दैश्चमानसः ॥ श्रीगुरुं परमानंदं दत्त इ॰ ॥ ४१ ॥ द
त्ते दत्तादि वाक्यं तारकं सर्वदेहिनां ॥ श्रद्धायुक्तो जपेन्नित्यं दत्त
इ॰ ॥ ४२ ॥ केशवं माधवं विष्णुं गोविंदं गोपतिं हरिं ॥ गुरुणा पठयेत् वि
द्वान् सर्वं च शुभावहं ॥ ४३ ॥ निरंजनं निराकारं देवदेवं जनार्दनं ॥

A project of the Rajwade Sanshodhan Mandal, Dhule and the Yashwantrao Chavan Pratishthan, Mumbai

(५)

स्तवराजमायायत्स्तोजपेन्नित्यं सर्वपापप्रणाशनं ॥४४॥ आदिनाथं सुरश्रेष्ठं जगत्स्तो
॥३॥ कृष्णशामं जगद्गुरुं। सिधराजं गुणातीतं रामं राजीवलोचनं ॥४५॥ ना
रायणं परंब्रह्म लक्ष्मीकांतं परापरं अप्रमेयं स्फुरानंदं नमो दत्तदि
गंबरं ॥४६॥ योगिराजो त्रिवरदः सुराध्यक्षो गुणांतकः ॥ अनुसू
यात्मजो देवो देवो गतिप्रदायकः ॥४७॥ गोपनीयः प्रयत्नेन देवै
सुरमुनीश्वरैः ॥ समस्तादृषिभिः सर्वैर्भक्त्यास्तुतो मासभिः ॥४८॥
नारदेन स्फुरेंद्रेण सनकाद्यैर्महात्मभिः ॥ गौतमेन च गार्गेण व्यासे
न कपिलेन च ॥४९॥ वामदेवेन दक्षेन अत्रिभार्गवमुद्गलैः ॥ व
सिष्ठप्रमुखैः सर्वैर्गीयते सर्वमादरात् ॥५०॥ विनायकेन रुद्रे
ण महासेनेन वै सदा ॥ मार्कंडेयेन धौम्येन कीर्तितं स्तवमुत्त
मं ॥५१॥ मरीच्यादिमुनींद्रैश्च शुककर्दमसत्तमैः ॥ अंगिराकुलपौ ॥३॥
लस्त्या भृगुः कश्यपजैमिनीः ॥५२॥ गुरुस्तव मधीयानो विजई

Joint project of the Rajawade Sanshodhan Mandal, Dhule and the Yashwantrao Chavan Pratishthan, Mumbai

सर्वदा भवेत् ॥ गुरोः सायुज्य माप्नोति गुरोर्नाम पठेद्बुधः ॥ ५३
(8A) गुरोः परतरं नास्ती सत्यं सत्यं महामुने ॥ इदं स्तोत्रं महा दिव्यं
स्तवराजं मनोहरं ॥ ५४ ॥ पठणाछ्रवणाध्याना सर्वान्कामानवा
प्नुयात् ॥ इति श्रीगुरुरहस्ये श्रीमहादेव शुक संवादे श्रीगुरुद
त्तस्तवराज स्तोत्रं संपुर्णं ॥ श्रीकृष्णार्पणमस्तु ॥ श्रीजगदंबार्पण
मस्तु ॥ शुभंभवतु ॥ श्रीगुरुदेवदत्त ॥ पांडुरंग शर्मेण लिख्य
ते भाद्रपद वद्य १४ बुधवासरे शके १८०४ चित्रभानु नाम संवत्स
रे: तद्दिने लिखीतं ॥ ५ ॥ ५ ॥ ५ ॥ ५ ॥ ५ ॥ ५ ॥

Joint project of the Rajwade Sanshodhan Mandal, Dhule and the Yashwantrao Chavan Pratishthan, Mumbai.

(5)

॥ श्रीगुरूदत्तात्रयार्पणमस्तु ॥ श्रीगुरुदेवदत्त

॥ इती श्री दत्तात्रेय स्तव राज स्तोत्रं समाप्तः ॥

"Joint project of the Rajawade Sanshodhan Mandal, Dhule and the Yashwantrao Chavan Pratishthan, Mumbai."

## मूळ प्रत पाहण्यासाठी संपर्क

---

**इतिहासाचार्य वि.का. राजवाडे संशोधन मंडळ, धुळे**
राजवाडे पथ, गल्ली नं. १, धुळे-४२४००१ (महाराष्ट्र)
**दूरध्वनी क्रमांक** (०२५६२) २३३८४८
**Email ID** : rajwademandaldhule@gmail.com